# संस्कृतवार्ता:

दिनाङ्क :-06.02.2025

प्रात: - 06:55

महाकुम्भ: - युवकुम्भ:

पञ्चविंशत्यधिकद्विसहस्रतमवर्षीय: जनजाती-सांस्कृतिक-समागम: अद्य प्रयागराजस्य महाकुम्भक्षेत्रे समायोज्यते यस्मिन् देशस्य पञ्चदश-सहस्राधिक-सङ्ख्यका: आदिवासिन: भागं स्वीकरिष्यन्ति। अस्माकं वार्ताहर: सूचितवान् यत् अस्मिन् षड्-दिवसात्मके कार्यक्रमे सर्वे आदिवासिजना: आदिवासिजगत: संस्कृते: परम्पराणाञ्च रक्षणार्थं संकल्पमपि स्वीकरिष्यन्ति। अवधेयं वर्तते यत् पञ्चविंशत्यधिक-द्विसहस्रतमं वर्षं बिरसामुण्डा-इत्यस्य पञ्चाशदधिकैकशततम्या: जयन्त्या: शुभावसरे जनजातीय-गौरववर्षत्वेन समुद्घोषितम्। आकाशवाण्या सह वार्तां सम्पादयन् अखिलभारतीय-कल्याणाश्रमस्य आयोजनसचिव: अतुलजोग: सूचितवान् यत् एतस्मिन् युव-कुम्भे देशस्य अष्टसहस्राधिकं यावत् आदिवासि-युवान: भागं भजिष्यन्ति। असौ अग्रे कथितवान् यत् केन्द्रीय-जनजातीय-विषयक- राज्यमन्त्री दुर्गादास-उइके-इत्येष: अस्य कार्यक्रमस्य उद्घाटनं करिष्यति। कार्यक्रमावधौ विविधराज्यानां पञ्चविंशतियुवान: सम्मानिता: भविष्यन्ति यै: आदिवासि-समुदायाय उत्कृष्टकार्यं सम्पादितम्। जनजातीयसमाजसम्बद्धस्य प्रदर्शनस्य अपि आयोजनं भविष्यति तथा च देशस्य विंशत्यधिक-एक-शतं सांस्कृतिक-नृत्यसमूहाः भागं स्वकलायाः प्रदर्शनं च करिष्यन्ति। ते त्रिवेणी-सङ्गमे अपि पवित्रं स्नानम् करिष्यन्ति।

मतदानम्-दिल्ली

सप्ततिसदस्ययुतायै दिल्ली-विधान-सभायै मतदानं ह्य: शान्तिपूर्णपद्धत्या सुसम्पन्नम्। अत्रावधौ भूयोऽपि षष्टि दशमलव चत्वारि द्वे प्रतिशतं यावत् मतदानं समनुष्ठितम्। सर्वाधिकं षड्-षष्टि प्रतिशतं यावच्च मतदानं उत्तर-पूर्वीय-जनपदे समङ्कितम्। तत्रैव न्यूनं मतदानं षड्पञ्चशत् दशमलव नवचत्वारि-प्रतिशतं यावत् दक्षिणपूर्वीय-दिल्ल्यां जातम्। येषां नेतृणां नियतिनिर्णय: ई.वी.एम्. इत्यस्मिन् यन्त्रे स्थापित: तेषु आमआदमीपार्टीतिदलस्य संयोजक: अरविन्द-केजरीवाल: आतिशी मनीषसिसोदिया: भाजपेतिदलस्य प्रवेशवर्मा विजेन्द्रगुप्ता अरविन्दसिंहलवली इत्येष: रमेश-बिधूड़ी इत्यसौ च सम्मिलिता: विद्यन्ते। आहत्य नवनवत्यधिक-षड्शतं प्रत्याशिन: निर्वाचनप्रतिस्पर्धायाम् आसन्। तमिलनाडो: इरोड-ईस्ट इत्यस्मिन् अथ च उत्तरप्रदेशस्य मिल्कीपुर इत्येतस्मिन् विधानसभासने अपि ह्य: उपनिर्वाचनाय मतदानं प्रतिपादितम्। इरोड-ईस्ट इत्यत्र प्रायश: सप्तषष्टि: दशमलव नव सप्त प्रतिशतम् अपरत्र मिल्कीपुरे पञ्चषष्टि: दशमलव-त्रीणि पञ्च प्रतिशतं यावत् मतदानं निष्पादितम्।

वैष्णवः-कृत्रिमबुद्धिमत्ता

सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः नवदिल्ल्याम् ओपन ए.आई. इत्यभिनामधेयकस्य प्रमुख-कार्यकारि-आधिकारिणा सैम-ऑल्टमैन-इत्यमुना साकं सहभागं समाचारितवान्। श्रीवैष्णवः प्रोक्तवान् यत् प्रधानमन्त्री नरेन्द्रमोदी तान् प्रौद्योगिकीनां लोकतन्त्रीकरणाय प्रेरयति अपि च श्रीऑल्टमैनइत्यसौ प्रधानमन्त्रिणः दृक्कोणस्य प्रशंसां कृतवान्।

मन्त्रिणा अग्रे निगदितं यत् असौ ओपन-ए.आई. इत्येतस्य अनेन अधिकारिणा सह सम्पूर्णनाम् ए.आई.-स्टैक-जीपीयू-प्रारूप-इत्येतेषां तन्त्रांशस्य च निर्माणस्य कार्यनीतौ बृहत्तमां चर्चां साधितवान्। ओपन ए.आई. इति एतेषु त्रिषु कार्येषु सहयोगार्थं तत्परं वर्तते।

टेनिस्-क्रीडा

वर्ल्ड-टेबल-टेनिस-इत्येतस्यां प्रतिस्पर्धायां, मानव-ठक्कर-मानुषशाइत्यनयोः भारतस्य उत्कृष्टं पुरुषाणां मिश्रित-युगलम् अद्य प्रागुपान्त्यचक्रे फ्रांसदेशीयेन फ्लोरियन-बौरासौड-एस्टेबन-डोर-इत्यनयोः मिश्रितयुग्मेन सह स्पर्धा भविष्यति। प्रतिस्पर्धायाः प्रसारणं भारतीयसमयानुसारि मध्याह्ने सार्ध-त्रिवादने भविष्यति।